संख्या ५ परिमाणम् ६ पृथक्त्वम् ७ संयोगः ८ विभागः ९ परत्वम् १० अपरत्वम् ११ बुद्धिः १२ सुखम् १३ दुःखम् १४ इच्छा १५ द्वेषः १६ यत्नः १७ गुरुत्वम् १८ द्रवत्वम् १९ स्नेहः २० संस्कारः २१ धर्म्मः २२ अधर्म्मः २३ शब्दः २४। इति भाषापरिच्छेदः ॥ (सात्त्विकनायकगुणा यथा, साहित्यदर्पणे। ३। ५८।
"शोभाविलासोमाधुर्य्यङ्गाम्भीर्य्यं धैर्य्यतेजसी। ललितौदार्य्यमित्यष्टौ सत्त्वजाः पौरुषागुणाः ॥
एतेषां विशेषविवरणन्तु तत्तच्छब्दे द्रष्टव्यम् ॥) अप्रधानम्। सूदः। इन्द्रियम्। त्यागः। वटी। इति मेदिनी ॥ णे। १०॥ भीमसेनः। तन्तुः। दोषान्यविशेषणम्। इति हेमचन्द्रः ॥ विद्यादि। इति विश्वः ॥ (व्यञ्जनम्। यथा, मनुः। ३।२२६।
"गुणांश्च सूपशाकाद्यान् पयोदधिघृतं मधु। विन्यसेत् प्रयतःसम्यक् भूमावेव समाहितः ॥"
"गुणान् व्यञ्जनानि अत्रापेक्षयाऽप्राधान्यात् गुणयुक्तान् वा।" इति तट्टीकायां कुल्लूकभट्टः ॥ आवृत्तिः। यथा, महाभारते।
"आहारो द्विगुणः स्त्रीणां बुद्धिस्तासां चतुर्गुणा। षड्गुणो व्यवसायश्च कामश्चाष्टगुणः स्मृतः ॥") व्याकरणोक्तसंज्ञाविशेषः। यथा। इकोऽरलेङगः। अस्यार्थः। इ उ ऋ लृ एषां स्थाने ए ओ अर् अल् एते गुणसंज्ञा भवन्ति। इति मुग्धबोधम्। काव्यगुणस्य लक्षणं यथा,—
ये रसस्याङ्गिनो धर्म्माः शौर्य्यादय इवात्मनः। उत्कर्षहेतवस्ते स्युरचलस्थितयो गुणाः ॥
इति काव्यप्रकाशः ॥
तस्य भेदाः।
श्लेषः प्रसादः समता माधुर्य्यं सुकुमारता। अर्थव्यक्तिरुदारत्वमोजःकान्तिसमाधयः ॥
इति वैदर्भमार्गस्य प्राणा दश गुणाः स्मृताः ॥
इति दण्डी ॥
माधुर्य्यौजःप्रसादाख्यास्त्रयस्ते न पुनर्द्दश ॥
तस्य दशसंख्याभावे हेतुर्यथा,—
केचिदन्तर्भवन्त्येषु दोषत्यागात् परे श्रिताः। अन्ये भजन्ति दोषत्वं कुत्रचिन्न ततो दश ॥
इति भरतमुनिः। स्वल्पकगुणविशेषा उपवासशब्दे द्रष्टव्याः ॥

गुणकः, पुं, (गुणयति आवर्त्तयतीति। गुण + ण्वुल्।) पूरकाङ्कविशेषः। यथा, गुण्यान्त्यमङ्कं गुणकेन हन्यात्। इति लीलावती ॥

गुणकारः, पुं, (गुणं व्यञ्जनादिकं पाकजनितगुणं वा करोतीति। कृ + अण्। विराटनगरे छद्मवेशेन सूपकारित्वग्रहणात् पाकशास्त्रकर्तृत्वाच्च भीमस्य तथात्वम्।) भीमसेनः। इति त्रिकाण्डशेषः ॥ (विराटनगरेऽस्य सूपकारित्वस्वीकारकथा यथा, महाभारते। ४।२।१—४।
भीम उवाच।
"पौरोगवो ब्रुवाणोऽहं बल्लवो नाम नामतः। उपस्थास्यामि राजानं विराटमिति मे मतिः ॥ सूपानस्य करिष्यामि कुशलोऽस्मि महानसे। कृतपूर्व्वाणि यैरस्य व्यञ्जनानि सुशिक्षितैः ॥ तानप्यभिभविष्यामि प्रीतिं सञ्जनयन्नहम्। आहरिष्यामि दारूणां निचयान्महतोऽपि च ॥ तत्प्रेक्ष्य विपुलं कर्म्म राजा प्रीतो भविष्यति। अमानुषाणि कुर्व्वाणं तानि कर्म्माणि भारत ! ॥ राजलस्य परिप्रेष्या मंस्यन्ते मां यथा नृपम्। भक्ष्यान्नरसपानानां भविष्यामि तथेश्वरः ॥") पाचके गुणकारके च त्रि।

गुणज्ञः, त्रि, (गुणं जानातीति। गुण + ज्ञा + कः।) गुणवेत्ता। यथा,—
गुणिनि गुणज्ञो रमते नागुणशीलस्य गुणिनि परितोषः। अलिरेति वनात् कमलं न हि भेकस्त्वेकवासोऽपि ॥
इत्युद्भटः ॥

गुणनिका, स्त्री, (गुणयति पुनःपुनराम्रेडयतीति। गुणत् क आम्रेडने + "ण्यासश्रन्थो युच्।" ३।३।१०७। इति युच्। संज्ञायां कन् कापि अत इत्वञ्च।) नृत्यम्। शून्याङ्कम्। पाठनिश्चयः। इति मेदिनी ॥ के १९५। (शास्त्रादीनां पुनः पुनरनुशीलनम्। यथा, माघे। २। ७५।
"हेतुःपरिचयस्थैर्य्ये वक्तुर्गुणनिकेव सा ॥" माला। इत्यानन्दलहरीटीका॥ (यथा, आनन्दलहर्य्यां। ३।
"दरिद्राणां चिन्तामणिगुणनिका जन्मजलधौ निमग्नानां दंष्ट्रा सुररिपुवराहस्य भवती ॥")

गुणनी, स्त्री, (गण्यते पुनःपुनरनुशील्यतेऽनया। गुण + ल्युट् + ङीप्।) पाठनिश्चयः। तत्पर्य्यायः। भविनी २ शीलनम् ३। इति त्रिकाण्डशेषः ॥

गुणनीयः, पुं, (गुण्यते पुनःपुनरनुशील्यतेऽनेन इति। गुण आम्रेडने + करणे अनीयर्।) शास्त्राद्यभ्यासः। इति हारावली। १५०। (कर्म्मणि अनीयर्। गुणितव्ये त्रि ॥)

गुणभ्रंशः, पुं, (गुणस्य भ्रंशो विनाशः।) गुणनाशः। तत्पर्य्यायः पर्य्यन्तिका २। इति हारावली ॥ २१०॥

गुणलयनिका, स्त्री, (गुणा गुणनिर्म्मिताः पटाः लीयन्तेऽस्याम्। गुण + ली + अधिकरणे + ल्युट्। स्त्रियां ङीप् कन् टापि पूर्व्वह्रस्वश्च।) वस्त्रनिर्म्मितगृहम्। तत्पर्य्यायः केणिका २ पटकुटी ३। इति हेमचन्द्रः। ३। ३४६ ॥

गुणलयनी, स्त्री, (गुणा गुणमयपटाः लीयन्ते यत्र। ली + ल्युट् + ङीप्।) गुणलयनिका। इति हलायुधः ॥

गुणवान्, [त्] पुं, त्रि, (गुणोविद्यतेऽस्य। गुण + मतुप् मस्य वत्वम्।) सम्बन्धी। इति त्रिकाण्डशेषः ॥ गुणविशिष्टः। यथा, "दाता दयालुर्गुणवान्नरः स्यात् नरे परेषामुपकारकर्त्ता। इति कोष्ठीप्रदीपः ॥ (पुं, यदुवंशीय सुनाभस्य दौहित्रः। यथा, हरिवंशे। १५५।
"गुणवत्यपि पुत्रश्च गुणवन्तमजीजनत् ॥"
स्त्रियां ङीप्। तस्य सुनाभस्य दुहिता। यथा, तत्रैव। १५३।
"वज्रनाभस्य तनयः सुनाभो नाम विश्रुतः। दुहितृद्वयञ्च नृपते ! तस्य रूपगुणान्वितम्। एकचन्द्रवती नाम्ना गुणवत्यथ चापरा ॥" गायत्रीरूपा महादेवी। यथा, देवीभागवते। १२। ६। १२।
"गुहावासा गुणवती गुरुपापप्रणाशिनी ॥" गङ्गा। यथा, काशीखण्डे। २९। ५३।
"गूढ़रूपा गुणवती गुर्व्वी गौरववर्द्धिनी ॥" अप्सरोविशेषः। यथा, तत्रैव ९ अध्याये।
"अलम्बुषा गुणवती स्थूलकेशी कलावती ॥"

गुणवृक्षकः, पुं, (गुणानां तरणीरज्जूनां वृक्ष इव। ततः स्वार्थे कन्।) नौकागुणबन्धनस्तम्भः। मास्तुल इति भाषा। तत्पर्य्यायः। कूपकः २। इत्यमरः। १। १०। १२।

गुणसागरः, पुं, (गुणानां सागर इव आधारस्थानम्।) ब्रह्मा। इति शब्दरत्नावली ॥ बुद्धविशेषः। इति त्रिकाण्डशेषः ॥ सकलगुणाधारश्च ॥

गुणा, स्त्री, (गुणाः सूत्रतन्तवः सन्त्यस्याः। "अर्श आदिभ्योऽच्।" ५। २। १२७। इत्यच्। स्त्रियां टाप्।) दूर्व्वा। मांसरोहिणी। इति राजनिर्घण्टः ॥

गुणाकरः, पुं, (गुणानामाकर इव। गुणबाहुल्यात्तथात्वम्।) बुद्धः। इति शब्दरत्नावली ॥ (महादेवः। यथा, महाभारते। १३। १७। ४७।
"गणहा देवहा कालो लोकधाता गुणाकरः ॥") गुणयुक्ते त्रि। यथा,—
"तपस्विभिरतस्याथ तस्य पुत्त्रो गुणाकरः। सत्यवान् नाम देवर्षे ! मनसा सम्वृतो मया ॥"
इति वनपर्व्वणि सावित्रीव्रतकथा ॥

गुणितः, त्रि, (गुण्यते स्म। गुण आम्रेडने + क्तः।) पूरितः। तत्पर्य्यायः। आहतः २। इत्यमरः। ३। १। ८८॥ यथा। पञ्चधा गुणिता द्वादशसंख्या षष्टिर्भवतीत्यादि इति भरतः ॥ (गुणोऽस्य जातः। तारकादिभ्य इतच्।) पिच्छितः। इति शब्दरत्नावली ॥

गुणी, [न्] पुं, (गुणो ज्या विद्यतेऽस्य। गुण + इनिः।) धनुः। इति त्रिकाण्डशेषः ॥ (गुणास्ते तु दाक्षिण्यादयो विद्यन्तेऽस्येति।) गुणविशिष्टे त्रि। यथा। गुणिगणगणनारम्भे न पतति कठिनी ससम्भ्रमाद्यस्य। तेनाम्बा यदि सुतिनी वद बन्ध्या कीदृशी नाम ॥ इति हितोपदेशः ॥

गुणीभूतः, त्रि, (अगुणो गुणोभूतः। गुण + भू + क्तः। अभूत तद्भावे च्वि।) अप्रधानीभूतः। यथा। कृतपूर्व्वीकटमित्यत्र समासनिविष्टत्वाद्गुणीभूतादिशेषबोधिका द्वितीया नोक्ता। इति सुषेणकविराजः ॥ (तथाच महाभारते। २। १५। ११।
"सर्व्वैरपि गुणैर्युक्तो निर्व्वीर्य्यः किं करिष्यति। गुणीभूता गुणाः सर्व्वे तिष्ठन्ति हि पराक्रमे ॥"